Downloaded From: http://www.cbseportal.com

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 11

No. of Printed Pages — 7

**SS—12–1—Sans. Sah. I**

# उच्च माध्यमिक परीक्षा, 2010

# Senior Secondary Examination - 2010

**वैकल्पिक वर्ग I** ( Optional Group I — HUMANITIES )

## संस्कृत साहित्य — प्रथम पत्र

## ( SANSKRIT SAHITYA — First Paper )

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 60

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकप्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकप्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथमप्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येकभागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचितविकल्पस्य उत्तराक्षराणि उत्तरपुस्तिकायां निम्नलिखिततालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयानि ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |



Downloaded From: http://www.cbseportal.com

Downloaded From: http://www.cbseportal.com



1. (i) 'सेवाधर्म: परम गहनो योगिनामप्यगम्य:' पद्यांशे प्रयुक्तं छन्द: वर्तते

(अ) शिखरिणी (ब) वसन्ततिलका

(स) मन्दाक्रान्ता (द) स्रग्धरा । $\frac{1}{2}$

(ii) द्वादशवर्णात्मकं छन्दो भवति

(अ) वसन्ततिलका (ब) भुजङ्गप्रयातम्

(स) हरिणी (द) शिखरिणी । $\frac{1}{2}$

(iii) उपमेयस्य उपमानेन सह सम्भावना प्रदर्श्यते तत्रालंकारो भवति

(अ) भ्रान्तिमान् (ब) सन्देह:

(स) यमकम् (द) उत्प्रेक्षा । $\frac{1}{2}$

(iv) 'विकारश्चैतन्यं भ्रमयति च सम्मीलयति च' उदाहरणमस्ति

(अ) दीपकस्य (ब) स्वभावोक्ते:

(स) उत्प्रेक्षाया: (द) भ्रान्तिमात: । $\frac{1}{2}$

2. अधोलिखित श्लोकयो: एकस्य श्लोकस्य छन्दस: नामोल्लेखं कुरुत — 1

(क) जाड्यं धियो हरति सिञ्चति वाचि सत्यम् ,
मानोन्नतिं दिशति पापमपाकरोति ।
चेत: प्रसादयति दिक्षु तनोति कीर्तिं,
सत्सङ्गति: कथय किं न करोति पुसाम् ॥

(ख) विद्या नाम नरस्यरूपमधिकं प्रच्छन्नगुप्तं धनम् ,
विद्या भोगकरी यश: सुखकरी विद्यागुरूणां गुरु: ।
विद्या बन्धुजनो विदेश गमने विद्या परा देवता,
विद्या राजसु पूज्यते न हि धनं विद्याविहीन: पशु: ॥

3. अधोलिखित श्लोके अलङ्कारनामोल्लेखं कुरुत — 1

इदं कर्णोत्पलं चक्षु:,
इदं वेति विलासिनी ।
न निश्चिनोति हृदयं,
किन्तु दोलायते मन: ।



Downloaded From: http://www.cbseportal.com

Downloaded From: http://www.cbseportal.com



4. अधोलिखित चतुर्षु पद्येषु कयोश्चिद् **द्वयो:** पद्ययो: हिन्दी भाषायां सप्रसंगं व्याख्या कार्या —

( 1 + 3 ) × 2 = 8

(अ) यथोर्णनाभि: सृजते गृह्वाते च,
यथा पृथिव्यामोषधय: संभवन्ति ।
यथा सत: पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम् ॥

(ब) स्थित: स्थितामुच्चलित: प्रयाताम् ,
निषेदुषीमासनबन्ध धीर: ।
जलाभिलाषी जलमाददानाम् ,
छायेव तां भूपतिरन्वगच्छत् ॥

(स) आरम्भगुर्वी क्षयिणी क्रमेण,
लघ्वी पुरा बृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥

(द) समस्तास्ते देवा रिपुविहित संक्लेशमथिता:,
सुधाया: सम्प्राप्तौ जलधिजलमन्थं प्रविदधु: ।
अयं चेदादर्शो मनसि मनुजानां स्थिरतरो
भवेत्ते कां सिद्धिं न हि भुवि लभेरन् श्रमवशाद् ॥

5. निम्नाङ्कितेषु चतुर्षु कयोश्चिद् **द्वयो:** श्लोकयो: संस्कृतभाषायां सप्रसंगं व्याख्या कार्या —

( 1 + 3 ) × 2 = 8

(अ) मेधां मे वरुणो ददातु
मेधामग्नि: प्रजापति: ।
मेधामिन्द्रश्च वायुश्च
मेधां धाता ददातु मे स्वाहा ॥

(ब) यं मातापितरौ क्लेशम् ,
सहेते सम्भवे नृणाम् ।
न तस्य निष्कृति: शक्या
कर्तुं वर्ष शतैरपि ॥

(स) यादृशं वपते बीजम् ,
क्षेत्रमासाद्य कर्षक: ।
सुकृते दुष्कृते वापि,
तादृशं लभते फलम् ॥

(द) विहाय शान्तिं नृप ! धाम तत्पुन:,
प्रसीद सन्धेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय नि:स्पृहा:,
शमेन सिद्धिं मुनयो न भूभृत: ॥



Downloaded From: http://www.cbseportal.com

Downloaded From: http://www.cbseportal.com



6. अधोलिखितेषु केषाञ्चित् **चतुर्णां** प्रश्नानामुत्तराणि संस्कृतभाषायां लिखत — 4 × 2 = 8

(i) 'वेदोपदेश:' पाठानुसारेण कीदृशा: क्रतव: न आयान्तु ?

(ii) 'उपनिषद्-वचनामृतम्' पाठाधारेण आप्तकामा: ऋषय: केन यानेन आक्रमन्ति ?

(iii) 'आचार: परमो धर्म:' पाठानुसारेण आचाराद् मानव: किं किं लभते ?

(iv) 'रामपृष्ट-कुशलप्रश्ना:' पाठानुसारेण कीदृशा: मन्त्रिण: राज्ञा नियोजयितव्या: ?

(v) 'मानुष्याद् देवतां गता' पाठाधारेण उप्तं क्षेत्रं कं विना निष्फलं भवति ?

(vi) 'दिलीपस्य गोसेवा' पाठानुसारेण सम्राट् नन्दिन्या: समाराधने काभि: क्रियाभि: तत्परोऽभूत् ?

(vii) 'नीति वचनानि' पाठाधारेण केषां यश:काये जरामरणजं भयं नास्ति ?

(viii) 'द्रौपद्या: मन्युव्यवसायदीपिनीगिर:' पाठाधारेण द्रुपदात्मजा क्षमामेव सुखस्य साधनं मन्यमानं युधिष्ठिरं किमकथयत् ?

7. अधोलिखितेषु चतुर्षु कयोश्चिद् **द्वयो:** नाट्यांशयो: हिन्दी भाषायां सप्रसंग-व्याख्या कार्या —

( 1 + 4 ) × 2 = 10

(अ) दुर्योधन: — तेन हि समर्थयितुमिच्छामि ।

द्रोण: — पुत्र ! केन समर्थयितुमिच्छसि ?

दुर्योधन: — मातुलेन ।

द्रोण: — किं शकुनिना ? ( स्वगतम् ) हन्त ! विपन्नं कार्यम् ।

दुर्योधन: — मातुल ! इतस्तावत् । वयस्य कर्ण ! इतस्तावत् ।

( सर्वे परिक्रम्योपविशन्ति )

दुर्योधन: — मातुल ! पाण्डवानां राज्यार्थं प्रति को निश्चय: ?

शकुनि: — न दातव्यमिति मे निश्चय: ।

दुर्योधन: — दातव्यमिति वक्तुमर्हति मातुल: ।

शकुनि: — यदि दातव्ये राज्ये किमस्माभि: सह मन्त्रयसे । ननु सर्वमेव प्रदीयताम् ।

दुर्योधन: — अथेदानीं,

गुरुकरतलमध्ये तोयमावर्जितं मे,
श्रुतमिह कुलवृद्धैर्यत् प्रमाणं पृथिव्याम् ।
तदिदमपनयो वा वञ्चना वा यथा वा
भवतु नृप ! जलं तत् सत्यमिच्छामि कर्तुम् ॥



Downloaded From: http://www.cbseportal.com

Downloaded From: http://www.cbseportal.com



(ब) बाल: — जृम्भस्व सिंह, दन्तांस्ते गणयिष्ये ।

प्रथमा — अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्वानि विप्रकरोषि ? हन्त, वर्धते ते संरम्भ: । स्थाने खलु ऋषि जनेन सर्वदमन इति कृत नामधेयोऽसि ।

राजा — किं नु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मन: ? नूनमनपत्यता मां वत्सलयति ।

द्वितीया — एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्या: पुत्रकं न मुञ्चसि ।

बाल: — ( सस्मितम् ) अहो, बलीय: खलु भीतोऽस्मि । ( इत्यधरं दर्शयति )

राजा — महतस्तेजसो बीजं, बालोऽयं प्रतिभाति मे ।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थित: ॥

प्रथमा — वत्स, एनं बालमृगेन्द्रं मुञ्च । अपरं ते क्रीडनकं दास्यामि ।

बाल: — कुत्र ? देह्येतत् ( इति हस्तं प्रसारयति )

(स) वृद्धा — ( सास्रम् ) हा पुत्रक ! शंखचूड ! कथं व्यापाद्यमानोऽद्य किल त्वं मया प्रेक्षितव्य: ? अनेन मुखचन्द्रेण विरहितमिदानीम् अन्धकारी भविष्यति पातालम् ।

शंखचूड: — अम्ब ! किमिति वैक्लव्येन सुतरां न पीडयसि ?

वृद्धा — ( निर्वर्ण्य पुत्रकस्याङ्गानि स्पृशन्ति ) हा पुत्र ! कथं ते अदृश्यकिरणं सुकुमारं शरीरं निघृणहृदयो गरुड आहारयिष्यति ? ( कण्ठे गृहीत्वा रोदिति )

शंखचूड: — अम्ब ! अलं परिदेवितेन ( गन्तुमिच्छति )

वृद्धा — पुत्रक ! तिष्ठ मुहूर्तम् , यावत् ते वदनं प्रेक्षे ।

किंकर: — एहि, कुमार शंखचूड ! किं ते एतया भणन्त्या ? पुत्रस्नेह मोहिता खल्वेषा न जानाति राजकार्यम् ।

(द) कन्हैयादत्त: — ( पनसमेकतोऽपनयति ) ( आकाशे नरेन्द्रं लक्षीकृत्य ) रे देशघातक ! नरेन्द्र ! धनातिगर्धिन् , भुङ्क्ष्व स्वकर्मफलमद्य यथार्हमेतत् ।
यत्त्वं प्रयासि निरये ननु युक्तमेतत् , सर्वोऽपि याति निजकर्मफलानुबन्धम् ॥
( तत: प्रविशति नरेन्द्रेण सह दौवारिक: । नरेन्द्रो यथास्थानमुपविशति दौवारिको निष्क्रामति )

कन्हैयादत्त: — आगच्छ, मित्र ! स्वागतम् कथय किं तत्र वक्तव्यम् ?

नरेन्द्र: — सर्वेऽप्येते धनदानेन हिंसां समुत्साहयन्ति ।

कन्हैयादत्त: — इहापि कतिचन मृषैव आसिद्धा: । इति कथमसहायकान् वक्ष्यामि ?

नरेन्द्र: — मयोक्तं त्वयापि वक्तव्यमेव, नान्यथा मोक्ष: ।

कन्हैयादत्त: — कथमनपराधिनो दिदण्डयिष्यन्ते ।



Downloaded From: http://www.cbseportal.com

Downloaded From: http://www.cbseportal.com



8. अधोलिखितेषु चतुर्षु **द्वयोः** संस्कृतभाषायां सप्रसंग-व्याख्या कार्या — ( 1 + 3 ) × 2 = 8

(अ) सिद्धार्थकः — किं न जानाति भदन्तोऽमात्यराक्षसस्य सन्निहित इति तदमुद्रा लाञ्छितमपि मां निष्क्रमन्तं कस्य शक्तिर्निवारयितुम् ।

क्षपणकः — श्रावक, राक्षसस्य पिशाचस्य वा भव न पुनरमुद्रालाञ्छित स्येतो निष्क्रमणोपायः ।

सिद्धार्थकः — भदन्त, न कुप्य । कार्यासिद्धिर्भवतु ।

क्षपणकः — श्रावक, गच्छ । भवतु ते कार्यसद्धिः । अहमपि भागुरामणात् मुद्रां याचे ( इति निष्क्रान्तौ ) ( प्रविश्य )

पुरुषः — जयतु कुमार ! आर्य ! गुल्मस्थानाधिकृतो दीर्घरक्षो विज्ञापयति 'एष खल्व स्माभिः कटकान्निष्क्रामन्नगृहीतमुद्रः सलेख पुरुषो गृहीतः ।

(ब) राजा — वेत्रवति ! क्रोधस्य विजयाय क्षमैवाहूयताम् ।

प्रतिहारी — यद्देव आज्ञापयति । ( इति निष्क्रम्य क्षमया सह प्रविशति )

क्षमा — ( सश्लाघमात्मानं निर्वर्ण्य ) अहो, अहम्

क्लमो न वाचां शिरसो न शूलं, न चित्ततापो न तनो विमर्दः ।

न चापि हिंसादिरनर्थयोगः श्लाघ्या परं क्रोधजयेऽहमेका ॥

( इत्युभे परिक्रामतः ) ( उपविश्य) आज्ञापयतु देवः । किमर्थमाहूतो दासीजनः ।

राजा — अस्मिन् सङ्ग्रामे दुरात्मा क्रोधस्त्वया जेतव्यः ।

क्षमा — देवस्याज्ञया महामोहमपिजेतुं पर्यतास्मि किं पुनः क्रोधं तदनुचरमात्रम् ।

(स) द्वितीयः सहचरः — सत्यम् एव साम्प्रतं जीवनं नरकायते ( प्रतापमभिलक्ष्य ) भगवन् मम अपि कार्यं समापयितु । अहमपि जीवितुं न इच्छामि ।

भिल्लः — ( सर्वान् मरणोद्यतान् दृष्ट्वा ) हा ! अस्माकमपि जीवनेन को लाभः ? वयं देशरक्षायै न किमपि कर्तुं समर्थाः, तदा मरणमेव अस्माकं श्रेयस्करम्

( प्रतापस्य सहचरान् स्वेषामपि बलिदान करणाय प्रार्थयन्ते )

प्रतापः — हा धिक् ! भवन्तः सर्वे इदं किं कुर्वन्ति ? आत्महननं महत्पापं वर्तते ।

स्थीयताम् , स्थीयताम् । कष्टानि सोढ्वा वीरगत्या मरणं कल्याणप्रदं कथ्यते । इत्थम् आत्महननं तु नपुंसकानां कर्म । किंचिद् धैर्येण विचारयन्तु ।



Downloaded From: http://www.cbseportal.com

Downloaded From: http://www.cbseportal.com



(द) नरेन्द्रः — उत्तिष्ठ ! बन्धो उत्तिष्ठ । ( निरीक्ष्य ) अरे ! अन्धोऽयम् । ( पुनरपि उत्थापयन् ) अहो पङ्गुश्च। ( रुधिरस्पर्शं नाटयन् ) हा हन्त ! रुधिरक्लिन्नम् अस्य मस्तकम् । तत् किं करोमि ? तदेवं करोमि । ( स्ववस्त्रम् आच्छिद्य व्रणपट्टिकां तन्मस्तके वध्नन् ) समाश्वसिहि । बन्धो समाश्वसिहि ।

अन्धः — कस्त्वम् अकारणबन्धुः मम हतभाग्यस्य ?

( नरेन्द्रः तं तूष्णीं परिचरति )

अन्धः — कथं न भाषते ? तत् किं यथाहम् अन्धः इदानीं पङ्गुश्च तथा किम् अयमपि मम अकारण बन्धु बधिरो मूकश्च ? हा दैव ! हा भगवन् ।

नरेन्द्रः — बन्धो ! नाहं मूको वा बधिरो वा । किं ते मन्नाम्ना प्रयोजनम् ? प्रथमं तावद् त्वां पर्यवस्थापयामि ततश्च यथावसरं विदित नामधेयं त्वां करिष्यामि ।

9. अधोलिखितेषु केषाञ्चित् **चतुर्णां** प्रश्नानामुत्तराणि संस्कृत भाषायां लिखत — 4 × 2 = 8

(i) 'सत्य प्रतिज्ञा सदा कुरुणाम्' पाठानुसारेण 'स्वर्गः मृतैः प्राप्य इति' कथनं कीदृशमस्ति ?

(ii) 'शकुन्तलावण्यं प्रेक्षस्व' पाठाधारेण भगवता मारीचेन कदा कानामौषधिर्दत्ता ?

(iii) 'परोपकाराय शरीरलाभः' पाठानुसारेण वैनतेयस्य भोजनार्थं वध्यशिलां कः कथं गच्छति ?

(iv) 'विवेकोदयम्' पाठानुसारेण अपन्थानं गच्छन्तं जनं कः विमुञ्चति ?

(v) 'क्रान्तिकारिणां देशभक्तिः' पाठानुसारेण कन्हैयादत्तः पनसं विपाट्यातिप्रसन्नः कथं भवति ?

(vi) 'संस्थापयिष्ये मम धर्मराज्यम्' पाठाधारेण नृपतौ दुर्वृते सति के किं कृत्वा स्वच्छन्दं विहरन्ति ?

(vii) 'उदारमना भामाशाहः' पाठानुसारेण कः किमर्थं विपुलां धनराशि प्रतापाय समर्पयति ?

(viii) 'दीनोद्धारकः नरेन्द्रः' पाठानुसारेण स्व जिज्ञासां प्रशमयितुं कः कं निकषा गच्छति ?

10. अधोलिखितेषु छन्दःसु कस्यचिदेकस्य लक्षणोदाहरणं लिखत — 3

(अ) शिखरिणी

(ब) भुजङ्गप्रयातम्

(स) हरिणी ।

11. निम्नाङ्कितेषु अलङ्कारेषु कस्यचिदेकस्य लक्षणोदाहरणं लिखत — 3

(अ) यमकः

(ब) सन्देहः

(स) अर्थान्तरन्यासः ।



Downloaded From: http://www.cbseportal.com